संस्कृत-वार्ता:

दिनाङ्क : 23/03/2026

सायम् - 06:20

आदौ मुख्यवार्ता:

- प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् पश्चिम-एशिया-क्षेत्रे सङ्घर्षे सत्यपि भारते कोऽपि ऊर्जा-सङ्कटः नास्ति, देशे च इन्धन-आपूर्तिः स्थिरा वर्तते।

- अमेरिका-इस्रायल-ईरान-देशानां मध्ये परस्परं प्रहाराणां प्राबल्येण पश्चिम-एशिया-क्षेत्रे सङ्घर्षः उत्तरोत्तरं संवर्धते।

- अद्य सम्पूर्णराष्ट्रं महान्-स्वातन्त्र्य-सेनानिभ्यः भगतसिंह-राजगुरु-सुखदेवेभ्यः तेषां हुतात्म-दिवसे सादरं श्रद्धाञ्जलिं व्याहरति।

- उत्तरकोरिया-देशस्य नेता किम-जोंग-उन 'राज्यकार्य-आयोगस्य' तृतीयवारं अध्यक्षत्वेन पुनः नियुक्तः।

----------

प्रधानमन्त्री-लोकसभा

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य लोकसभायां पश्चिम-एशिया-क्षेत्रस्य साम्प्रतिक-सङ्घर्ष-विषये प्रोक्तं यत् अस्मिन् सङ्कटकालेऽपि भारते ऊर्जा-सङ्कटः नास्ति। तेन स्पष्टीकृतं यत् देशे पैट्रोल-डिज़ल इत्यनयोः च आपूर्तिः सुचारुरूपेण प्रचलति।

प्रधानमन्त्रिणा प्रतिपादितं यत् भारतस्य समीपे त्रि-पञ्चाशत्-लक्ष-मीट्रिकटन-परिमितं रणनीतिक-पेट्रोलियम-भण्डारः वर्तते । तेन सूचितं यत् सर्वकारः पञ्चषष्टि-लक्ष-मीट्रिक-टनमिताय भण्डारणाय कार्यं करोति। विगतैकादशवर्षेषु भारतस्य परिशोधन-क्षमता गम्भीररूपेण प्रवृद्धा। प्रधानमन्त्रिणा प्रोदीरितं यत् सर्वकारः विभिन्न-देशानां आपूर्ति-कर्तृभिः सह निरन्तरं सम्पर्कं स्थापयति येन तैल-वातेन्धनयोः आपूर्तिः अविच्छिन्ना भवेत्।

प्रधानमन्त्रिणा विशेषतः उल्लेखितं यत् देशविदेशेषु च स्थितानां भारतीयानां सुरक्षा सर्वकारस्य सर्वोच्च-प्राथमिकता वर्तते। तेनोक्तं यत् सङ्घर्षस्य आरम्भात् एतावत्पर्यन्तं त्रि-दशांश-सप्त-पञ्च-लक्षमिताः भारतीयाः सुरक्षितं स्वदेशं प्रत्यागताः। प्रधानमन्त्रिणा विज्ञापितं यत् भारते प्रभावितदेशेषु च अहर्निशं नियन्त्रण-कक्षाः कार्यरताः सन्ति।

प्रधानमन्त्रिणा विज्ञापितं यत् भारतं स्वस्य षष्टि-प्रतिशतं एल.पी.जी.- आवश्यकतायै आयातस्य उपरि निर्भरं वर्तते, अतः सर्वकारेण अस्य उत्पादनं उपलब्धतां च वर्धयितुं कार्यं क्रियते । कृषकाणां प्रशंसां कुर्वन् सः अवदत् यत् देशस्य अन्न-भण्डारः पूर्णः अस्ति, उर्वरकस्य च समुचिता व्यवस्था कृता। प्रधानमन्त्रिणा व्यापारिक-पोतानां उपरि आक्रमणानां तीव्रा निन्दा कृता। अन्ते सः विश्वासं प्रकटितवान् यत् यथा भारतेन कोरोना-कालस्य सम्मचखीकरणं कृतं तथैव एतस्य सङ्कटस्य अपि दृढतया सम्मुखीकरणं करिष्यति इति।

पश्चिम एशिया-संघर्षः

इस्रायल-देशेन हिजबुल्ला-सङ्घटनं विरुध्य स्वकीयं सैन्याभियानं सजवीकृतम्। इस्रायल-वायुसेनया बेरूत-नगरस्य दक्षिण-उपनगरेषु वैमानिक-आक्रमणानां आरम्भो कृतः। एतानि आक्रमणानि तावत् निवासिभ्यः निष्क्रमण-सूचना प्रदाय कृतानि। इस्रायल-सेनायाः वक्तव्यं अस्ति यत् सा सङ्घटनेन सम्बद्धानि केन्द्राणि आधारभूत-संरचनानि च लक्ष्यीकरोति। लेबनान-देशे तीव्रतर-सङ्घर्षेण सह मानवीय-सङ्कटमपि निरन्तरं वर्धते। लेबनान-प्रशासनेन विज्ञापितं यत् प्रायः षष्टिसहस्राधिक-सप्तलक्षमिताः जनाः विस्थापिताः अभवन्। दक्षिणभागे स्वास्थ्यकेन्द्रेषु आक्रमणेन आपत्सेवाः बाधिताः। अत्रान्तरे, तेहरान इत्यनेन कठोरतया प्रत्युत्तरं प्रदत्तम्। आइ-आरजीसी-दलेन प्रमाणितं यत् तेन हिन्द-महासागरे स्थितं 'डिएगो गार्सिया' इति अमेरिका-ब्रिटेन सैन्य-अधिष्ठाने द्वे प्रक्षेपास्त्रे प्रक्षिप्ते। एतेन सङ्घर्षस्य व्याप्तिः अधिकं प्रवर्धमाना दृश्यते। संयुक्त-अरब-अमीरात-देशे अधिकारिणः अवदन् यत् उच्च-सतर्कतायाः मध्ये अपि स्थितिः नियन्त्रणाधीना वर्तते। निवासिनः आधिकारिक-निर्देशानां पालनाय साग्रहं प्रार्थिताः। वायु-सीम्नि प्रतिबन्धकारणात् विमान-सेवाः परिमिताः सन्ति।

भगतसिंहः

अद्य सम्पूर्णदेशः स्वातन्त्र्य-सेनानिभ्यः भगतसिंह-शिवरामराजगुरु-सुखदेवथापर-महोदयेभ्यः तेषां हुतात्म-दिवसे सादरं श्रद्धाञ्जलिं व्याहरति। भारतस्य स्वातन्त्र्य-आन्दोलने महत्त्वपूर्ण-भूमिकायाः कारणात् आङ्गल-शासकैः एकत्रिंशदधिक-एकोनविंशतितमे वर्षे अस्मिन्नेव दिने लाहौर-नगरे एतेभ्यः मृत्युदण्डः प्रदत्तः। तेषां त्याग-स्मृतौ भगतसिंहस्य पैतृक-ग्रामे खटकड़कलां इत्यत्र राज्य-स्तरीय-कार्यक्रमः समायोज्यते। अत्रावसरे उप-राष्ट्रपतिः सी. पी. राधाकृष्णन्, प्रधानमन्त्री नरेन्द्रमोदी तथा च अन्ये नेतारः हुतात्म-वीरेभ्यः श्रद्धाञ्जलिं समर्पितवन्तः। लोकसभा-राज्यसभा इत्यनयोः उभयोः सदनयोः अपि एतेभ्यः त्रिभ्यः क्रान्तिकारिभ्यः सम्मानं विज्ञापितं। राज्यसभायाः सभापतिः राधाकृष्णन् इत्येषः अवदत् यत् - तेषां बलिदानं केवलं स्वातन्त्र्य-सङ्ग्रामस्य घटना नासीत्, अपितु एषः सः निर्णायक-क्षणः आसीत् येन राष्ट्रस्य चेतना जागृता, उपनिवेष-शासनं विरुध्य एकतायाः प्रेरणा प्रदत्ता।

वित्त-विधेयकं

लोकसभायां षड्विंशत्यधिक-द्विसहस्रतम-वर्षस्य वित्त-विधेयकं चर्चायै स्वीकृतम्। अस्य विधेयकस्य उद्देश्यं षड्विंशत्यधिक-द्विसहस्रतम-वर्षतः सप्तविंशत्यधिक-द्विसहस्रतम-वित्तवर्षपर्यन्तं केन्द्र-सर्वकारस्य वित्तीय-प्रस्तावानां विधिसम्मततया प्रवर्तनं इति वर्तते।लोकसभायां वित्तमन्त्री निर्मला-सीतारामन् इत्येषा एतं विधेयकं पुरःस्थापितवती। चर्चायाः आरम्भे काङ्ग्रेस-पक्षस्य डॉ. अमर-सिंहेन देशे वृत्तिहीनतायाः विषयः उत्थापितः। तेन आरोपितं यत् कतिपय-संस्थानानि एव सर्वकारेण प्रदत्तस्य कर-मुक्तेः लाभं प्राप्नुवन्ति।

नामाङ्कन

असम-केरल-पुडुचेरी-राज्यानां विधानसभानिर्वाचनार्थं नामाङ्कन-प्रक्रिया अद्य सायंकाले समाप्ता। श्वः नामाङ्कनानां परीक्षणं भविष्यति। अभ्यर्थिनः गुरुवासरपर्यन्तं नामाङ्कनं प्रत्याहर्तुं शक्नुवन्ति। एतेषु राज्येषु केन्द्रशासितप्रदेशेषु च मतदानम् आगामि-मासस्य नवम-दिनाङ्के एकस्मिन् चरणे भविष्यति। नागालैण्ड-राज्ये अपि कोरिडांग-निर्वाचनक्षेत्रस्य आगामि-विधानसभा-उप-निर्वाचनार्थं नामाङ्कनपत्राणां प्रस्तुतीकरण-प्रक्रिया अद्य समाप्ता। मतगणना मई-मासस्य चतुर्थ-दिनाङ्के भविष्यति।

निर्वाचन-प्रसारण

भारत-निर्वाचनायोगेन चतुर्षु राज्येषु, एकस्मिन् केन्द्रशासित-प्रदेशे च आगामि-विधानसभा-निर्वाचनार्थं राष्ट्रिय-राज्यस्तरीय-दलानां कृते दूरदर्शन-आकाशवाण्योः निःशुल्क-प्रसारण-निमित्तं डिजिटल-प्रमाणकानि वितरितानि। अस्याः योजनायाः अन्तर्गतं प्रत्येकस्मै दलाय दूरदर्शन-आकाशवाण्ययोः माध्यमेन निःशुल्क-प्रसारण-सुविधार्थं पञ्चचत्वारिंशत् निमेषाणां समयः आवंटितः अस्ति। एषा सुविधा राज्यस्य प्रादेशिक-सञ्जालस्य अन्तर्गतं सर्वेभ्यः दलेभ्यः समानरूपेण उपलप्स्यते।

उत्तरकोरिया

प्योङ्ग्याङ्ग-नगरे सर्वोच्चजनसभायाः उपवेशनस्य अनन्तरं उत्तरकोरिया-देशस्य नेता किम-जोंग-उन 'राज्यकार्य-आयोगस्य' अध्यक्षत्वेन पुनः नियुक्तः। षोड्शधिक-द्विसहस्रतमे वर्षे संस्थायाः स्थापनायाः अनन्तरं एषः तस्य निरन्तरं तृतीयः कार्यकालः अस्ति।

।। इति वार्ताः ।।